# श्रीगुरुपादपूजापद्धतिः

अथ विघ्नेश्वर प्रार्थना :-

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।

संकल्पः :-

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीगुरोः प्रसादसिद्ध्यर्थं दृढवैराग्यपूर्वक-परिपूर्णज्ञानसिद्ध्यर्थं च श्रीगुरुपादपूजां करिष्ये।

ध्यानम् :-

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं, द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यदिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं, भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि।।
ब्रह्मविद्याप्रदातारं सद्गुरुमावाहयामि, ध्यायामि।

१. आसनम् :-

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः।।
सर्वव्यापिने सद्गुरवे नमः, आसनं समर्पयामि।।

२. पूर्णकुम्भः :-

अन्तः पूर्णो बहिष्पूर्णः पूर्णकुम्भ इवार्णवे।
अन्तः शून्यो बहिः शून्यः शून्यकुम्भ इवाम्बरे।।
पूर्णाय सद्गुरवे नमः, पूर्णकुम्भं समर्पयामि।।

३. पाद्यम् :-

यत्पादपंकजद्वन्द्वग्रहणेन मुमुक्षवः। तुरीयं पादमीप्सन्ति तस्मै श्रीगुरवे नमः।।
तुरीयपादप्रापकाय सद्गुरवे नमः, पाद्यं समर्पयामि।।

४. अर्घ्यम् :-

अलब्ध्वाऽतिशयं यस्माद् व्यावृत्तास्तमसादयः।
गरीयसे नमस्तस्मा अविद्याग्रन्थिभेदिने।।
अविद्यानाशकाय सद्गुरवे नमः, अर्घ्यं समर्पयामि।।

५. स्नानम् :-

यच्छुद्धवाक्यतीर्थेषु स्नाताः पुण्या मुमुक्षवः।
विरजा ब्रह्म गच्छन्ति तस्मै श्रीगुरवे नमः।।
महावाक्योपदेशकर्त्रे सद्गुरवे नमः, स्नानं समर्पयामि।।

६. वस्त्रम् :-

मूलं तरोः केवलमाश्रयन्तः पाणिद्वयं भोक्तुममत्रवन्तः।
कन्यामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

कृतकृत्याय सद्गुरवे नमः, वस्त्रं समर्पयामि। भस्मादिकं च समर्पयामि।।

७. गन्धः :-

विप्राणां विनयो ह्येषः शमः प्राकृत उच्यते।
दमः प्रकृतिदान्तत्वादेवं विद्वान् शमं व्रजेत्।।
प्रकृतिशान्ताय सद्गुरवे नमः, शीतान् गन्धान् समर्पयामि।।

८. कुंकुमम् :-

श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः।
ब्रह्मण्युपरतः शान्तः निरिन्धन इवानलः।।
विरक्ताय सद्गुरवे नमः, हरिद्राकुंकुमं समर्पयामि।।

९. पुष्पमाला :-

येन षड्लिंगसूत्रेण कृता तात्पर्यमालिका।
वेदान्तवाक्यपुष्पेभ्यः तस्मै श्रीगुरवे नमः।।
वेदान्ततात्पर्यबोधकाय सद्गुरवे नमः, पुष्पमालिकां समर्पयामि।।

१०. अर्चना :-

भावाद्वैतं सदा कुर्यात् क्रियाद्वैतं न कर्हिचित्।
अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह।।
परमपूज्याय सद्गुरवे नमः, पुष्पैः पूजयामि।।
(गुर्वष्टोत्तरनामावलिभिः पुष्पार्चनं कुर्यात्)

११. धूपः :-

चन्दनागरुधूपेन सुगन्धो मारुतो यथा।
यस्य संगादहं धन्यः तस्मै श्रीगुरवे नमः।।
सत्पुरुषाय सद्गुरवे नमः, धूपमाघ्रापयामि।।

१२. दीपः :-

आवृतस्वस्वरूपाणां त्रितापक्लिष्टदेहानां।
शास्त्रवाक्यार्थदीपेनऽऽवृतिनाशकमाश्रये।।
आवृतिनाशकाय सद्गुरवे नमः, दीपं दर्शयामि।।

१३. नैवेद्यम् :-

क्षुत्पिपासाऽऽन्ध्यबाधिर्यकामक्रोधादयोऽखिलाः।
लिंगदेहगता एते ह्यलिंगस्य न विद्यते।।
क्षुत्पिपासारहिताय सद्गुरवे नमः, इदं सर्वं निवेदयामि।।

१४. नीराजनं :-

हिरण्मये परे कोशे विरजं ब्रह्मनिष्कलं।
तच्छुभ्रं ज्योतिषां ज्योतिः तद्यदात्मविदो विदुः।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।।
ज्योतिःस्वरूपाय सद्गुरवे नमः, नीराजनं सन्दर्शयामि।।

१५. सर्वोपचाराः :-

अजमनिद्रमस्वप्नं अनामकमरूपकं। सकृद्विभातं सर्वज्ञं नोपचारः कथंचन।।
अव्यवहाराय सद्गुरवे नमः, सर्वोपचारान् समर्पयामि।।

१६. स्तोत्रम् :-

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः।
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारं।।
न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये।
स्वीयं साम्यं विधत्ते निरुपमस्तेन वाऽलौकिकोऽपि।।
निरुपमाय सद्गुरवे नमः, स्तोत्राणि समर्पयामि।।

प्रदक्षिणनमस्काराः :-

यस्य प्रसादादहमेव विष्णुः मय्येव सर्वं परिकल्पितं च।
इत्थं विजानामि सदाऽऽत्मरूपं तस्यांघ्रिपद्मं प्रणतोऽस्मि नित्यं।।
दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम्।
बुद्ध्वा पदमनानात्वं नमस्कुर्मो यथाबलं।।
स्वात्मरूपाय सद्गुरवे नमः, अनन्तकोटिप्रदक्षिणनमस्कारान् समर्पयामि।।

गुरुपादपूजाकर्मसाद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।। वैदिकपुष्पांजलिं कृत्वा
यदक्षरं पदं भ्रष्टं मात्राहीनं च यद् भवेत्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर।।

अथ गुर्वष्टोत्तरशतनामावलिः :-

ॐ सद्गुरवे नमः
ॐ अज्ञाननाशकाय नमः
ॐ अदम्भिने नमः
ॐ अद्वैतप्रकाशकाय नमः
ॐ अनपेक्षाय नमः
ॐ अनसूयवे नमः
ॐ अनुपमाय नमः
ॐ अभयप्रदात्रे नमः
ॐ अमानिने नमः
ॐ अहिंसामूर्तये नमः
ॐ अहेतुकदयासिंधवे नमः
ॐ अहंकारनाशकाय नमः
ॐ अहंकारवर्जिताय नमः
ॐ तेजस्विने नमः
ॐ त्यक्तसर्वपरिग्रहाय नमः
ॐ त्यागिने नमः
ॐ दक्षाय नमः
ॐ दान्ताय नमः
ॐ दृढव्रताय नमः
ॐ दोषवर्जिताय नमः
ॐ द्वन्द्वातीताय नमः
ॐ धीमते नमः
ॐ धीरायनमः
ॐ नित्यसंतुष्टाय नमः
ॐ निरहंकाराय नमः
ॐ निराश्रयाय नमः
ॐ महात्मने नमः
ॐ महावाक्योपदेशकर्त्रे नमः
ॐ मितभाषिणे नमः
ॐ मुक्ताय नमः
ॐ मौनिने नमः
ॐ यतचित्ताय नमः
ॐ यतये नमः
ॐ यदृच्छालाभसंतुष्टाय नमः
ॐ युक्ताय नमः
ॐ रागद्वेषवर्जिताय नमः
ॐ विदिताखिलशास्त्राय नमः
ॐ विद्याविनयसंपन्नाय नमः
ॐ विमत्सराय नमः



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

ॐ आचार्येन्द्राय नमः
ॐ आत्मसंतुष्टाय नमः
ॐ आनन्दमूर्तये नमः
ॐ आर्जवयुक्ताय नमः
ॐ उचितवाचे नमः
ॐ उत्साहिने नमः
ॐ उदासीनाय नमः
ॐ उपरताय नमः
ॐ ऐश्वर्ययुक्ताय नमः
ॐ कृतकृत्याय नमः
ॐ क्षामवते नमः
ॐ गुणातीताय नमः
ॐ चारुवाग्विलासाय नमः
ॐ चारुहासाय नमः
ॐ छिन्नसंशयाय नमः
ॐ ज्ञानदात्रे नमः
ॐ ज्ञानयज्ञतत्पराय नमः
ॐ तत्त्वदर्शिने नमः
ॐ तपस्विने नमः
ॐ तापहाराय नमः
ॐ तुल्यनिन्दास्तुतये नमः
ॐ तुल्यप्रियाप्रियाय नमः
ॐ तुल्यमानापमानाय नमः

ॐ निर्भयाय नमः
ॐ निर्मदाय नमः
ॐ निर्ममाय नमः
ॐ निर्मलाय नमः
ॐ निर्मोहाय नमः
ॐ निर्योगक्षेमाय नमः
ॐ निर्लोभाय नमः
ॐ निष्कामाय नमः
ॐ निष्क्रोधाय नमः
ॐ निस्संगाय नमः
ॐ परमसुखदाय नमः
ॐ पंडिताय नमः
ॐ पूर्णाय नमः
ॐ प्रमाणप्रवर्तकाय नमः
ॐ प्रियभाषिणे नमः
ॐ ब्रह्मकर्मसमाधये नमः
ॐ ब्रह्मात्मनिष्ठाय नमः
ॐ ब्रह्मात्मविदे नमः
ॐ भक्ताय नमः
ॐ भवरोगहराय नमः
ॐ भुक्तिमुक्तिप्रदात्रे नमः
ॐ मंगलकर्त्रे नमः
ॐ मधुरभाषिणे नमः

ॐ विवेकिने नमः
ॐ विशालहृदयाय नमः
ॐ व्यवसायिने नमः
ॐ शरणागतवत्सलाय नमः
ॐ शान्ताय नमः
ॐ शुद्धमानसाय नमः
ॐ शिष्यप्रियाय नमः
ॐ श्रद्धावते नमः
ॐ श्रोत्रियाय नमः
ॐ सत्यवाचे नमः
ॐ सदामुदितवदनाय नमः
ॐ समचित्ताय नमः
ॐ समानाधिकवर्जिताय नमः
ॐ समाहितचित्ताय नमः
ॐ सर्वभूतहिताय नमः
ॐ सिद्धाय नमः
ॐ सुलभाय नमः
ॐ सुशीलाय नमः
ॐ सुहृदे नमः
ॐ सूक्ष्मबुद्धये नमः
ॐ संकल्पवर्जिताय नमः
ॐ संप्रदायविदे नमः
ॐ स्वतन्त्राय नमः

।। ब्रह्मार्पणमस्तु ।। हरिः ॐ तत्सत् ।।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM